CC-0. In Public Domain. Digitization by eGangotri

Other Manuscript

Manu - 11

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविवाहप्रारंभः॥

श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकोपियरीपरबाबूकोलेश्वरसिंहकेमकानमेंबाबूकिशुनदयाल
सिंहकेगणेशप्रभाकरछापाखानेमें — विवाहछापाग
याजिसेलेनाहोयउसेचौकमेंनईसड़कपरबाबूकोले
श्वरसिंहकेदुकानपरमिलैगाशोधाबालशास्त्रीमधुणेनेलिखाहरिनन्दनछापनेवालारामदत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·प· श्रीगणेशायनमः॥ सुमखश्चैकदंतश्चकपिलोगजकर्णकः॥ लंबोदरश्चविकटोविघ्ननाशोविनायकः॥१॥ धूम्रकेतुर्ग
१ णाध्यक्षोभालचंद्रोगजाननः॥ द्वादशैतानिनामानियः पठेच्छृणुयादपि॥२॥ विद्यारंभेविवाहेचप्रवेशेगमनेतथा॥ संग्रा
मेसंकटेचैवविघ्नस्तस्यनजायते॥३॥ स्वस्तिश्रीमहागणाधिपतयेनमः॥ हरिः ॐ गणानांत्वागणपतिꣳ हवामहे
प्रियाणांत्वाप्रियपतिꣳ हवामहेनिधीनांत्वानिधिपतिꣳ हवामहेवसोमम॥ आहमजानिगर्भधमात्वमजासिगर्भधम्॥१
सुमुहूर्त्तमस्तुतथास्तु॥ ॐ विश्वानिदेवसवितर्दुरितानिपरासुव॥ यद्भद्रंतन्नआसुव॥ स्वस्तिन इंद्रोवृद्धश्रवाः स्वस्तिनः
पूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोवृहस्पतिर्दधातु॥ दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायसह
सपत्नरथोजीवशरदःशतम्॥ द्यौःशांतिरंतरिक्षꣳ शांतिःपृथ्वीशांतिरापःशांतिरोषधयःशांति र्वनस्पतयःशांतिर्वि
श्वेदेवाःशांतिर्ब्रह्मशांतिःसर्वꣳ शांतिःशांतिरेवशांतिःसामाशांतिरेधिद्विपद्भ्यःशंचतुष्पदेभ्यःशुभशांतिर्वरदा
भवतु॥१॥ इतिविश्वानसंपूर्णम्॥ अथातःसंप्रवक्ष्यामिगणयागंसुखावहं॥ कामकेवाप्तकेयज्ञेविवाहेव्रतसंयमे राम०
॥१॥ आदौगणेश्वरंपूज्यसर्वकामफलप्रदं॥ मासमासाधिपंदेवंगणपसंलभेन्नरः॥२॥ येनासौपूजितस्तेनमासा १
॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

चार्यैः प्रपूजितः॥ कोसौमासपतिर्देवःतत्र धूपेन धूपितः॥३॥ ज्येष्ठमासेकृतं पूज्यं यज्ञकालेसनातनं॥ मंडलं प्रथमं पू
ज्यं कोष्ठद्वादशमुत्तमं॥४॥ सिंदूरेणार्चितो देवईशानेतुविनायकः॥ग्रहयुक्तंनतः स्थाप्यं मासेमासेधिकंफलं॥५॥ गणा
धिपंमार्गशीर्षेपौषेवैनायकंनया॥गजवक्त्रंचमाघेचभालचंद्रंचफाल्गुने॥६॥ चैत्रमासेतुवेदांगं वैशाखेशिवसूनुकं॥
ज्येष्ठेशिवसुतंपूज्यं आषाढेहरनंदनं॥७॥ श्रावणेनायकंदेवं भाद्रेचमोदकप्रियं॥ आश्विनेचमहावीर्यंमहावीर्यंचका
र्त्तिके॥८॥विघ्नहर्त्ताधिकेमासेएवंपूज्यंगणेश्वरं॥गंधपुष्पैस्तथाधूपैः कर्पूरैर्यक्षकर्दमैः॥९॥ मृगमदैः कुंकुमैश्चसिंदू
रेणविशेषतः॥ रक्तोत्पलदलैः पूज्यंबिल्वपत्रेणकेसरैः॥१०॥मालतीकेतकीपुष्पैर्हेमपुष्पैर्विचक्षणः॥ अर्घं धूपंच
दीपंचरक्तवस्त्रेणछादनं॥११ पूजायां कुरुतेदेवदद्यान्मोदकभोजनं॥नमोदेवगणेशायनमस्तेविघ्ननाशिने
॥१२॥ नमस्तेमूषकारूढ शुभकारायवैनमः॥ नमःकात्यायनीपुत्र लंबकर्णायवैनमः॥१३॥ गजदंतविरूपाक्षन्
विद्याबुद्धिविचक्षण॥ देहिमेपुत्रसौभाग्यं देहिमेसुखसंपदम्॥१४॥ इच्छासमधिपंदेवं वरंवैनायकेश्वरं॥ शत्रूणां
दुष्टपेकेचिद्दुर्जनारीवकर्षिते॥१५॥तेषांदंडहितार्थायप्रार्थयंतुगणेश्वरं॥ आदौपूजागणेशस्य शांतिश्चैवविशेष
तः॥१६॥ नाशयेत्सर्वदुःखानिकल्याणंचभवेत्सदा॥ कृष्णेनभाषितंपूर्वं देवतापरिकीर्तिता॥१७॥ मंडलंपत्रयज्ञे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चभुक्तस्तत्र विनायकः॥ आयुः कर्ता शांति कर्ता वरदो भव पूजितः १८॥ इति गणयागसंपूर्णः॥ श्रीमहागणाधिपतये
नमः जलस्नानं कारयामि॥ गंधं समर्पयामि॥ अक्षतान् समर्पयामि॥ पुष्पाणि समर्पयामि॥ धूप मा घ्रापयामि॥ दीपं द
र्शयामि॥ नैवेद्यं समर्पयामि॥ नैवेद्यांते आचमनं॥ हिरण्यगर्भ इति दक्षिणां समर्पयामि॥ अथ कलशप्रतिष्ठा॥ तत ईशान को
णे अव्रणकलशं अक्षतविभूषितं स्थाप्य भूमिस्पर्शनमंत्रः॥ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भवनस्य धर्त्री पृथि
वीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः॥ धान्यमसीति धान्यं॥ धान्यमसि धिनुहि देवान्प्राणाय त्वो दानाय त्वा व्यानाय
त्वा दीर्घामनु प्रसितिमायुषे धां॥ देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि
नस्योपरि कलशं स्थापयेत्॥ अथ पूजनं॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसदन्यसि
वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥ इति स्नानं॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं
सर्वभूतानां तामिहोपह्वये श्रियं॥ इति गंधं॥ ॐ अक्षन्नमीमदंत ह्यव प्रिया अधूषत॥ अस्तोषत स्वभानवो विप्रा नविष्ठ
या मती योजान्विंद्र ते हरी॥ इत्यक्षतानि॥ श्रीश्च ते लक्ष्मीरिति पुष्पं। धूरसि धूर्व धूर्वंतं धूर्वतं योस्मान् धूर्वति तं एम·
धूर्व यं वयं धूर्वामः॥ देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्। इति धूपं। अग्निर्ज्योतिर्ज्योति २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रग्निः स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चोज्योतिर्वर्चः स्वाहा सूर्योवर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः सूर्यः सू
र्योज्योतिः स्वाहा। इति दीपं। ॐ नाभ्या आसीदंतरिक्षꣳ शीर्ष्णो द्यौः समवर्तत॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २॥
अकल्पयन्॥ इति नैवेद्यं॥ शीतलं निर्मलं तोयं कर्पूरेण सुवासितं॥ आचम्यतां सुरश्रेष्ठ मया दत्तं च भक्तितः। इत्याचमनं
। हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ स दाधार पृथ्वीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
इति दक्षिणां॥ अथ कलशप्रार्थना॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृग
णाः स्मृताः॥ १॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः॥ २॥ अंगैश्च सहिताः
सर्वे कलशं तु समाश्रिताः॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥३॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं॥ त्व
त्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥४॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवासि वि
ष्णुस्त्वं च प्रजापतिः ॥५॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ सर्वेपि त्वयि तिष्ठंति यतः कामफलप्रदाः॥६॥
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ ७॥ इति कलशपूजनं संपूर्णम्॥
ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम॥ आहम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि·प जानिगर्भधमात्वमजासिगर्भधं॥१॥ श्रीगणेश इहागच्छ इह तिष्ठ॥ ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वे
२ न आवः॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥२॥ ब्रह्मन्॥ ॐ विष्णो रराटमसि विष्णोः
श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा॥३॥ विष्णवे नमः॥ शंभवाय च मयोभवाय च नमः शं
कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥४॥ शिवा०॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमश्विनौ व्यात्तं॥ इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण॥५॥ लक्ष्मि॥ पंचनद्यः सरस्वतीमपियन्ति सस्रोतसः
॥ सरस्वती तु पंचधा सो देशे भवत्सरित्॥६॥ सरस्व०॥ ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः॥ ए
मेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥७॥ क्षेत्रपाल०॥ ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृ
तं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥८॥ सूर्य०॥ ॐ इमं देवा असपत्नꣳसुवध्वं महते क्षत्रा
य महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी राजा सोमोस्माकं ब्रा
ह्मणानां राजा॥ चंद्रमा०॥ ९॥ ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्॥ अपाꣳरेताꣳसि जिन्वति॥ राम
१०॥ भौम॥ ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च॥ अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वे ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवायजमानऋसीदत॥ ११॥बुध ॥ॐ बृहस्पतेअतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु॥यद्दीदयच्छवसऋ
तप्रजाततदस्मासुद्रविणंधेहिचित्रम्॥१२॥गुरो०॥अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयःसोमंप्रजापतिः
ऋतेनसत्यमिंद्रियंविपानꣳशुक्रमंधसइंद्रस्येंद्रियमिदंपयोमृतंमधु॥१३॥शुक्र ॥शन्नोदेवीरभिष्टयऽआपोभवंतु
पीतये॥शंय्योरभिस्रवंतुनः॥१४॥शने०॥कयानश्चित्रआभुवदूतीसदावृधःसखा॥ कयाशचिष्ठयावृता॥१५॥राहो०
॥ॐकेतुंकृण्वन्नकेतवेपेशोमर्या अपेशसे॥समुषद्भिरजायथाः॥१६॥केतो०॥ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥त्र्यंब कं०॥जयंती मंगलाकाली भद्रकाली कपालिनी॥दुर्गाक्षमाशि
वाधात्रीस्वाहास्वधानमोस्तुते॥१८॥कुलदेवि॥अग्निर्देवतावातोदेवता सूर्योदेवताचंद्रमादेवतावसवोदेवतारु
द्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता॥१९॥आवोदेवासईं
महेवामंप्रयंत्यध्वरे॥आषोदेवासऽआशिषायज्ञियासहवामहे॥२०॥ब्रह्मामुरारिस्त्रिपुरांतकारि भानुः शशी भूमि
सुतोबुधश्च॥गुरुश्चशुक्रःशनिराहुकेतवःसर्वेग्रहाः शांतिकराभवंतु॥२१॥इतिनवग्रहपूजनम्॥ॐ॥ ॐगणाधि
पंनमस्कृत्यनमस्कृत्यपितामहं॥विष्णुंरुद्रंश्रियंदेवींवंदेभक्त्यासरस्वतीं॥१॥स्थानाधिपंनमस्कृत्यदिननाथंनिशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि·प·
४

करं॥ धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं॥२॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहं॥ राहुं केतुं नमस्कृत्य यज्ञारंभे
विशेषतः॥३॥ शक्राद्यादेवताः सर्वे मुनींश्चैव कथयाम्यहं॥ गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमं॥४॥ वसिष्ठं मुनि
शार्दूलं विश्वामित्रं तथैव च॥ व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदं॥५॥ विद्याधिकाये मुनय आचार्याश्च त-
पोधनाः॥ तान्सर्वान्प्रणमाम्येव यज्ञरक्षाकरान्सदा॥६॥ पूर्वे रक्षतु गोविंद आग्नेय्यां गरुडध्वजः॥ याम्यां रक्षतु वा
राहो नारसिंहस्तु नैरृते॥७॥ वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः॥ उत्तरे श्रीधरो रक्षेदीशाने तु गदाधरः
॥८॥ ऊर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः॥ एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः॥९॥ शंखो रक्षेच्च यज्ञाग्रे
पृष्ठे खड्गस्तथैव च॥ वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः॥ ब्रह्माणं माधवो रक्षेदाचार्यं पातु माधवः॥ अच्युतो
वतु ऋग्वेदं यजुर्वेदमधोक्षजः॥११॥ कृष्णश्च सामगं रक्षेदाथर्विकं च माधवः॥ उपदेष्टारं तु यो विप्रस्तं रुद्रोवतु सर्व
दा॥१२॥ यजमानं सपत्नीकं कमलाक्षश्च रक्षतु॥ रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षतां हरिः॥१३॥ वेदमंत्रैश्च क-
र्तव्या रक्षा शुभैश्च सर्षपैः॥ आदौ जपेद्गणानां त्वा निरुक्तं जातवेदसं॥१४॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य स राम
र्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥१५॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मकर्मसमारंभेन॥१६॥इतिरक्षाविधानंसंपूर्णं॥ देवताभ्योरक्षासूत्रदानं ततो ब्राह्मणानांरक्षाबंधनं कर्तव्यं॥
तत्रमंत्रः॥ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणां॥ दक्षिणा श्रद्धामाप्नोति श्रद्धयासत्यमाप्यते॥१॥ ततस्तिल
कमंत्रः॥ ॐ युंजंतिब्रध्नमरुषंचरंतंपरितस्थुषः रोचंतेरोचनादिवि युंजंत्यस्यकाम्याहरी विपक्षसारथेशोणाधृष्णू
नृवाहसा॥१॥ अथवरंवृणीते॥ बलबुद्धिर्वैदेवाः एतस्यग्रहस्यहोमंपृच्छत्येतस्मादेतं वर्गेसमृद्धिपतिः क्षिप्रेणाद्यमंत्र
हंजुहावदंतितस्माद्वरंवृणीतेमंत्रोयं॥ ॐ यदाबध्नंदाक्षायणाहिरण्यं शतानीकायसुमनस्यमानाः॥ तन्म आब
ध्नामिशतशारदायायुष्मांजरदष्टिर्यथासं॥१॥ ॐ त्वंयविष्ठदाशुषोनॄं पाहिशृणुधीगिरः॥रक्षातोकमुततत्मना॥२॥
येनराजाबलिर्बद्धोदानवेंद्रोमहाबलः॥तेनत्वामनुबध्नामिरक्षेमाचलमाचल॥३॥ वाचास्तु वाचं यन्मयाभाषितंपू
र्वं कन्यादानवचस्ततः इदमर्पमिदंपाद्यमस्तुद्धीकरणायच॥१॥ पूर्वकेभवेवा चास्तुवाक्॥ उद्देरेद्शमासेस्वपोवि
ताचाष्टवर्षका॥ तुभ्यंकन्यांप्रदास्यामिदेवाग्निगुरुसंनिधौ॥१॥ इतिवरवरणं॥ ॐ अथवरमाहउपानहमुपमुंच
तु॰ अग्नेर्हविर्देयो घृतकुंभप्रवेशः तत्रस्थितोवरहोम्यः दूरेधनाद्दिसंभ्रमः तस्माद्वरमाहउपानहोउपमुंचतात्॥
अयाग्निकांस्यपात्रयोर्वेष्ठितमादायतनुषकेशशर्करारहितायांगोमयेनोपलिप्तायांवेदिकायांस्फेनस्रुवेणवाप्रागग्रमादे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·प·
५
शमात्रमुह्लिखितायां उद्धेरवनक्रमेणानामिकांगुष्ठाभ्यांमृद्मुद्धृतायांजलेनाभ्युक्षितायांस्थापयेत्॥ तत्रसंकल्पंकु
र्यात्॥ ॐ तत्सद्द्योनमः परमात्मनेश्रीपुराणपुरषोत्तमाय अद्यब्रह्मणोद्वितीयप राईश्रीश्वेतवाराहकल्पेजंबूद्वीपे
भरतखंडेरामराज्येकुमारिकानाम्निक्षेत्रेवैवस्वतमन्वंतरे अष्टाविंशतितमेकलियुगेकलिप्रथमचरणेगंगायमुनयोः
पश्चिमेतटेनर्मदायाउत्तरेतटे अमुकसंवत्सरेऽमुकऋतौमहामांगल्यप्रदेमासानामुत्तमेऽअमुकमासेऽमुकपक्षेऽमु
कतिथावमुकवारेऽमुकशर्माहंदंपत्योर्विवाहसांगतासिद्ध्यर्थमग्निपूजनमहंकरिष्ये॥॥ अग्नेशांडिल्यगोत्र अरुणि
मातावरुणपिता अधोमुखः सन्मूर्द्धमुखोभवपाद्यादिदेयं॥ प्रथमेभंजनेआपोद्वितीयेक्षितमेवच॥ तृतीयेतिलदर्भौचच
तुर्थेघृतभक्षणं॥ १॥ पंचमेशर्करापानंषष्ठेचकीर्तितोयवः॥ सप्तमेपूर्णाहुतिश्चसप्तजिह्वाः प्रकीर्तिताः॥ २॥ इत्यग्निक
र्मसमाप्तं॥ ॐ मडघ्रीभवंति आचार्यऋत्विक्विवाह्योराजाप्रियस्नातकः कोयमाचार्यः॥ वेदांगीब्रह्मचारीचविद्वान्
वेदविचक्षणः॥ प्राज्ञोबुद्धिमतांश्रेष्ठो अयमाचार्यउच्यते॥ १॥ कोसौऋत्विक्ज्ञानीवहुगुणश्चैवचतुर्मखइवप्रभुः॥ ललितः
शीलसंयुक्तऋत्विगेवसउच्यते॥ २॥ कोसौविवाह्यः॥ रूपवांश्चगुणीज्ञानीविद्यावांश्चमहावली॥ मतिमानतिश्रेष्ठश्चएं राम
वंभूतोवरः स्मृतः॥ ३॥ कोराजा॥ इंद्रइवप्रजापालोरामोदाशरथिर्यथा॥ ईदृशोहिनृपोमान्यस्तस्यार्घ्यंचप्रदीयते॥ ५

CC-0. In Public Domain. Digitization by eGangotri

॥४॥काप्रिया॥रामस्यचप्रियासीताविष्णोर्लक्ष्मीस्तथैवच॥ईश्वरस्ययथागौरीप्रियाधर्म्याकथितेदृशी॥५॥कोसौस्नातकः॥
सत्यस्नातस्तपःस्नातःस्नातश्चनियमादिषु॥विद्यास्नातोव्रतस्नातःसपूज्यःस्नातकोव्रती॥६॥अथशाला॥ॐअथैनं
ंशालांप्रपादयतिस्वधेत्वैचानडुहस्यनासनीयासर्वेविभृतस्तेदेवाआभूवंधेन्वानडुहयोवापदंसर्वेविभृतोहंजद
न्येषांवैसांवीर्य्यंनदेन्वनडुहयोरदधुस्तस्मादेन्वश्चैवापोनड्वांश्चभूयिष्ठभुक्तस्तथैनत्सर्वास्यमिवजोधेन्वानडुहयोरा
स्मीयांदत्तगतिरिवतँहाजुतमभियंतोजयापेगर्भेनिरवधीदितिपापमकरदितिपापीकीर्तिरतस्माद्धेन्वानडुहयोरश्नापानदेहोवाप
जाज्ज्ञोत्स्योस्मामेवाहमँशालंचेतिभवतीति॥१॥ॐअथैनँशालांप्रपादयतिसजघनेनाहवनीदक्षिणेत्सग्रेणगार्ह
पत्यँसोस्यसंचरोभवत्यपेनयद्दक्षैकसंचरोभवत्यसोत्यापाअग्निर्वैजोनिर्जज्ञस्यगर्भ्योदीक्षितोन रेणा वैजोनि
गर्भःसंचरनिजनिसजत्रैजनित्वसरिस्तदावर्नेतस्माद्यक्षैषसंचरोभवत्यासोत्याथै॥२॥ॐअथैनंशालांप्रपादयतिसप्र
पादयतित्वाचयतिजाधामाहविषायजंनिनानेविश्वापरिभूरस्तुयज्ञःगयस्फानःप्रतरणःसोपचरादर्जामितिग्रहावेऊ
र्जोगृहान्नःशिवःसोनोपापकृतःप्रचीरैसेवैनदाह॥३॥अत्रहैषकोदकपात्रमुपन्नपंतियथाराज्ञआमनपोदकमाह
रेदेवंनदितिवदस्तदुतयानकुर्जोन्मानुषँहतेयँकुर्षीतिविप्रधवैनद्यजस्यमानुषानेतिविपधंजज्ञस्करवानीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मान्नोपन्नयेत्॥४॥ आजगाम गौतमो यत्र प्रवहनस्य जैवलेरासनं महासनं महाजेर्यौदकं महारयं चकार तस्माहरच
कार॥५॥ सहोवाच ब्रह्मवृनै गौतम प्रपद्य इति सहोवाच प्रतिज्ञायते पेषचरो जानुकुमारस्याते वाचमभाषयास्तामे
ब्रूहीति॥६॥ सहोवाच देवेषु गौतमस्तद्वरेषु मानुषानां वहीति॥७॥ सहोवाच विज्ञायते हास्ति हिरण्यस्य पात्र गोरस्तु
नांदासीनां प्रवाराणां परिधानानाम नो भवान्वहारणरणतस्य पर्यन्तस्य भ्यवदान्यो भूदिति स वै गौतम तीर्थेन इस्सा इस्तु
यैम्यहं भवन्तमिति वाचमस्मैव पूर्वेनुपंतिसहोपाणिकृत्याउवाच॥८॥ अथ वरं वृणीते॥ बलवद्वै देवा एतस्याग्रे हास
होमं प्रह्यति तस्मादेतन्वरं थं समर्द्धपति स्विप्रेणाइममृत्युं जहादिति तस्माद्वरं वृणीते॥९॥ अथ वरं वृणीते यं थं हवे मे कंच
सुषुवाणो वरं वृणीते सोस्मै सर्वः समृध्यते तस्माद्वरं वृणीते॥१०॥ अथ वाराह्य उपानहौ उपमुंचते अग्नौ ह वै देवा घृतकुं
भं प्रवेशयं चक्रुस्ततो वराहः संबभूव तस्माद्वराहो गावः संजानते ह्यमेवैतदभिसंजानते स्व मेदै सतस्य भूनामेदोतद्रसस्प्रतिति॰
ष्ठति तस्माद्वाराह्य उपानहौ उपमुंचते॥११॥ इति शाला समाप्ता॥ इति प्रति संवत्सरमहो राम जाति स्नातकरतौ हि स्न
तावित्यः आसनार्हः साधुर्भवः आसने ऽहं साधुरिति वर उच्यते कः साधुः सत्यवान् शीलवान् ज्ञानवान् दृढवान् पर
दारपरित्यागो सोयं साधुरुच्यते दशदोषरहितश्च के दशदोषाः काणास्तः पिंगलः अतिदीर्घः अतिह्रस्वः कु॰

CC-0. In Public Domain. Digitization by eGangotri

स्मः क्षयी रोगी कुष्ठी दरिद्री अन्यासक्तः एतैर्दशदोषैर्रहितः स वरः साधुर्भवति॥ अर्चयिष्यामो भवंतमिति ब्रूयात् ॐ अर्च
येति वरेणोक्ते वरोपवेशनार्थं शुद्धमासनं दत्वा विष्टरमादाय ॐ विष्टरो विष्टरो विष्टर इत्यन्येनोक्ते॥ ॐ विष्टरः प्रतिगृह्यतामिति दा
ता वदेत्॥ ॐ विष्टरं प्रतिगृह्णामि इत्यभिधाय वरो विष्टरं गृहीत्वा॥ ॐ वर्ष्मोस्मीत्यस्याथर्वण ऋषिर्विष्टरो देवतानुष्टुप् छ
न्द उपवेशने विनियोगः॥ ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्य्यः॥ इमं तमभितिष्ठामि यो मा कश्चाभिदासति इत्य
नेनासने उत्तराग्रविष्टरोपरि वर उपविशति॥ तत्र उपविश्य यजमानः पाद्यमंजलिनादाय॥ ॐ पाद्यं पाद्यं पाद्यमित्यन्ये
नोक्ते॥ ॐ पाद्यं प्रतिगृह्यतामिति दाता वदेत् ॐ पाद्यं प्रतिगृह्णामि इत्यभिधाय यजमानांजलितोंजलिना पाद्यमादाय वरः॥
विराजो दोहोसीति प्रजापतिऋषिरापो देवता यजुः पादप्रक्षालनजलग्रहणे विनियोगः॥ ॐ विराजो दोहोसि विराजो दोहमशीय मम
पिपद्यायै विराजो दोहः॥ इति दक्षिणपादं प्रक्षालयति। अनेनैव क्रमेणानेनैव मंत्रेण वामचरणप्रक्षालनं॥ राजन्यवैश्ययो
स्तु प्रथमं वामपादप्रक्षालनं ततः पूर्ववद्विष्टरांतरं गृहीत्वा चरणयोरधस्तात् उत्तराग्रं वरः कुर्यात्॥ ततो दूर्वाक्षतफलपुष्प
चंदनयुतार्घपात्रं गृहीत्वा यजमानः ॐ अर्घो अर्घो अर्घः इत्यन्येनोक्ते॥ ॐ अर्घः प्रतिगृह्यतामिति दाता वदेत् ॐ अर्घं
प्रतिगृह्णामीत्यभिधाय यजमानहस्तादर्घं गृहीत्वा ॐ आपस्थ युष्माभिः सर्वान्कामानवाप्नुयानिति शिरस्यक्षतादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰प॰ कं किंचिद्दत्वा॥ ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टाऽ अस्माकं वीरा मा परासेचि मत्पयः इत्यर्घपात्र
७ स्थं जलमैशान्यां दिशि त्यजन् पठति॥ तत आचमनीयमादाय ॐ आचमनीयमाचमनीयमाचमनीयमित्यन्येनोक्ते ॐ
आचमनीयं प्रतिगृह्यतामिति दाता वदेत् ततो वर आचमनीयं प्रतिगृह्णामीत्यभिधाय यजमानहस्तादाचमनीयमा
दाय ॐ आमागन्यशसा सᳪं सृज वर्चसा॥ तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् इत्यनेन सकृदा
चामेत् इति द्विस्तूष्णीं॥ ततो यजमानः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय ॐ मधुपर्को मधु
पर्को मधुपर्कः इत्यन्येनोक्ते ॐ मधुपर्कः प्रतिगृह्यतामिति दाता वदेत् ॐ मधुपर्कं प्रतिगृह्णामि इति वरो वदेत्॥ ॐ मित्र
स्य त्वा चक्षुषा प्रतीक्षे इति यजमानकरस्थमेव निरीक्ष्य ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति
गृह्णामीत्यनेन मधुपर्कं गृहीत्वा वामहस्ते कृत्वा ॐ नमः श्यावास्यायान्नशने यत आविद्धं तत्ते निष्कृन्तामीत्यनामिक
यात्रिः प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां भूमौ किंचिन्निः क्षिपेत् पुनस्तथैव द्विः प्रत्येकं क्षिपेत्॥ ततो वरः ॐ यन्म
धुन इति कुत्स ऋषिर्मधुपर्को देवता जगती छन्दो मधुपर्कप्राशने विनियोगः॥ ॐ यन्मधुनो मधव्यं परमᳪं रूपम राम
न्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति इत्यनेन वारत्रयं मधुपर्कप्राशनं प्र ७

CC-0. In Public Domain. Digitization by eGangotri

निपाशने चैतन्मंत्रपाठः ॥ ततो मधुपर्कशेषमसंचरदेशे धारयेत् ॥ ततः द्विराचम्य वरः ॐ वाङ्म आस्येस्तु ॥ ॐ न
सोर्मे प्राणोस्तु ॥ ॐ अक्ष्णोर्मे चक्षुरस्तु ॥ ॐ कर्णयोर्मे श्रोत्रमस्तु ॥ ओं बाह्वोर्मे बलमस्तु ॥ ॐ ऊर्वोर्मे ओजोस्तु ॥
ॐ अरिष्टानि मेंगानि तनूस्तन्वा मे सह संतु इत्यास्यादि प्रत्येकं सर्वगात्राणि स्पृष्ट्वा ॐ गौर्गौर्गौरित्यन्येनाभिहिते यज
मानं च प्रस्तुके ततो वरः ॥ ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय
मागामनागामदितिं वधिष्ट ॥ मम चामुष्य चामुकशर्मणो यजमानस्य उभयोः पाप्मा हतः ॥ ॐ उत्सृजत तृणान्यत्ति
नितृणं छिं यात् ॥ अथ गो संकल्पः । अद्येत्यादि संकल्पं कृत्वा अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुक
नक्षत्रे गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ अस्य मधुपर्कस्य सिध्यर्थं मधुप
र्कांगे स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनपात्रां इमां गां दातुमहमुत्सृजे तेन श्रीयज्ञपुरुषः प्रीयतां ॥ दोग्ध्री धेनुरिति
मंत्रं पठेत् ॥ अत्रावसरे गृहं प्रविशति । वरो मातृकापूजां कुर्यात् । ततो वेदिकायां तुषकेशशर्करादिरहितायां हस्तमात्रप
रिमितायां चतुरस्रां भूमिं कुशैः परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्राग
ग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यामुपांसुमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि.प.
८

कांस्यपात्रस्थं वन्हिं अग्निकोणादानीय ग्रसङ्गमुखमुपसमाधाय तदुत्सार्थे किंचिन्निरुज्य कौतुकागाराद्वरः कन्यामा
नीयमंडपे उपविश्य ॐ जरांगच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा शतं च जीव शरदः सुवर्चा रयिं च पुत्रा।
नन्नुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वा परिधानवस्त्रं तस्यै ददाति वरः ततः ॐ या अकृन्तन्नवयंया अतन्व
त। याश्च देवीस्तंतूनभितोततंथ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वोत्तरीयं तस्यै ददाति
ततो वरः ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये। इति
पठित्वाधोवस्त्रं वरः परिधत्ते॥ ॐ यशसामाद्यावापृथिवी यशसेंद्राबृहस्पती॥ यशोभगश्च माविदद्यशो मा प्रतिपद्यता
म् इति पठित्वोत्तरीयं परिदधाति वरः॥ ततो वरस्य कन्यायाश्च द्विराचमनं॥ ततः कन्याप्रदेन परस्परं समंजेथां इति प्रेषणं
कन्यावरयोः परस्परमभिमुखीकरणं ॐ समंजंतु विश्वेदेवाः समापो हृदयानि नौ॥ संमातरिश्वा संधाता समुदेष्ट्री दधा
तु नौ इति वरः पठति॥ ततः कन्याप्रदकर्तृकं ग्रंथिबंधनम् कन्यावरयोः॥ अथ हस्तलेपनं मंगलाष्टकं॥ श्रीमत्पंकजवि
ष्टरो हरिहरौ वायुर्महेंद्रोनलो चंद्रो भास्करवित्तपालवरुणाः प्रेताधिपादिग्रहाः॥ प्रद्युम्नो नलकूबरः सुरगजश्चिंतामणि राम
कौस्तुभः स्वामी शक्तिधरश्च लांगलधरः कुर्वंतु नो मंगलं॥१॥ गंगा गोमति गोमतिर्गणपतिर्गोविंदगोवर्द्धनो गीता गोमय ८

CC-0. In Public Domain. Digitization by eGangotri

१ इयं प्रशस्तिः प्रतिश्लोकोनंतरं पठनीयेति सांप्रदायिकाः

गोरजो गिरिसुता गंगाधरो गौतमः ।। गायत्री गरुडो गदाधरगया गंभीर गोदावरी गंधर्वी ग्रहगोपगोकुलगणाः कुर्वंतु नो
मंगलम् ।। २ ।। स्वस्ति श्रीनंदनंदनचरणकमलभक्तिरनुरागधर्ममूर्तिधर्मावतार श्रीअग्रकुलकमलप्रकाशमहत्तां
मुकुटमणिः सभाशृंगारसद्विद्याविनोदेन कृतकीर्तिविस्तारिन अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्राय पौत्रा
य पुत्राय ।। नेत्राणां त्रितयं शुभं पशुपतेरग्नित्रयं पावनं यत्तद्विष्णुपदत्रयं त्रिभुवने ख्यातं च रामत्रयं ।। गंगावाहपथत्रयं
सुविमलं वेदत्रयं त्रीश्वरं संध्यायां त्रितयं द्विजैरभियुतं कुर्वंतु नो मंगलं ।। १ ।। गौरी श्रीकुलदेवता च सुभगा भूमिः प्रपू
र्णा शुभा सावित्री च सरस्वती च सुरभी सत्यव्रतारुंधती ।। स्वाहा जांबवती च रुक्मभगिनी दुःस्वप्नविध्वंसिनी वेला चांबुनि
धेः समीनमकराः कुर्वंतु नो मंगलम् ।। २ ।। अश्वत्थो वटवृक्षचंदनतरुर्मंदारकल्पद्रुमो जंबूनिंबकदंबचूतसरला वृक्षाश्च
ये क्षीरिणः ।। सर्वे ते फलमिश्रिता नवदला वैभ्राजनं राजते रम्यं चैत्ररथं सनंदनवनं कुर्वंतु नो मंगलम् ।। १ ।। वाल्मीकः सनकः
सनंदनमुनिर्व्यासो वशिष्ठो भृगुर्जाबालिर्जमदग्निरामजनकौ गर्गोंगिरा गौतमः ।। मान्धाता भरतो नृपश्च सगरो धन्यो दिली
पो नलः पुण्यो धर्मसुतो ययातिनहुषः कुर्वंतु नो मंगलम् ।। २ ।। लक्ष्मीः कौस्तुभपारिजातकसुधाधन्वंतरिश्चंद्रमा गावः काम
दुघाः स्त्रिनः सुरगजो रंभादिदेवांगनाः ।। अश्वः सप्तमुखः सुधा हरिधनुः शंखाभिधश्चांबुधेः रत्नानीति चतुर्दश प्रतिदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं कुर्वंतु नो मंगलम्॥ १॥ गंगासिंधुसरस्वती च यमुना गोदावरी नर्मदा कावेरी शरयू महेंद्रतनया चर्मण्वती वेदिका॥ क्षिप्रा
वेत्रवती महासुरनदी ख्याता च या गंडकी पूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वंतु नो मंगलम्॥ २॥ दुर्गे दुर्गविनाशिनी भयहरी
मानामयी हारिणी कामाक्षा गिरिजा उमा भगवती चामुंडेश्वरी योगिनी॥ वंदे सुंदरि भैरवी सुललिता सिद्धेश्वरी रेणुका वारा
ही वरदायिनी गिरिसुताः कुर्वंतु नो मंगलम्॥ ३॥ शेषस्तक्षकशंखकालिकमुदाः पद्मस्थिता वासुकी श्री कार्कोटक प
द्मशंखक इति ख्याताश्च ये पन्नगाः॥ अन्ये कानन गह्वरेषु जलधौ ये प्रातरब्धौ स्थितं ते प्रातःस्मरणं सनंदनवनं कुर्वंतु नो
मंगलम्॥ ४॥ ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यो ग्रहाणां पतिः शक्रो देवपतिर्यमः पितृपतिश्चंद्रश्च तारापतिः॥ वि
ष्णुर्यज्ञपतिर्हविर्हुतपतिः स्कंदश्च सेनापतिः सर्वे ते मुनयः सुमेरुसहिताः कुर्वंतु नो मंगलम्॥ ५॥ सिद्धार्थप्रतिकालि
दासकविनाकुंभाः प्रपूर्णा जलैः पुष्पं चंदनशंखशूकरसटी गोरोचनं श्रीफलं॥ विप्रा वेदविदः प्रभातसमये गोकांच
नव्रीहयो दूर्वामिश्रिततंदुलैः प्रतिदिनं कुर्वंतु नो मंगलम्॥ अमुना प्रकारेण प्रपौत्रीं पौत्रीं पुत्रीम्॥ ३॥ शाखोच्चारणं क
न्यादानं॥ अथ कन्यादानं॥ दाता शंखस्थदूर्वाक्षतफलपुष्पचंदनजलान्यादाय जामातृदक्षिणकरोपरि कन्यादक्षिणा
करं निधाय ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतं॥ वरोसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः इति पठित्वा गोत्रोच्चार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णं कुर्यात्॥ ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकवासरे अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रा
य अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय अमुकगोत्रस्यामुकप्र
वरस्यामुकशर्मणः प्रपौत्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पु
त्रीमहमनेन कर्मणा त्रिरावर्त्य पठनीयं अमुकगोत्राय अमुकप्रवराय अमुकशर्म्मणे कन्यार्थिने श्रीधररूपिणे वराय अमु
कगोत्रां अमुकप्रवरां अमुकनाम्नीं इमां कन्यां वरार्थिनीं सालंकारां प्रजापतिदैवत्यां स्वर्गकामः पुराणोक्तशतगुणितज्यो
तिष्टोमातिरात्रयज्ञजन्यपुण्यफलप्राप्तिकामश्च पत्नीत्वेन तुभ्यमहं संप्रददे॥ ॐ स्वस्तीति प्रतिवचनं॥ ॐ द्यौस्त्वा ददा
तु पृथिवी त्वा प्रतिगृह्णातु इति वरः पठेत्॥ ततः कन्याप्रदः ॐ अद्य कृतैतत्कन्यादानप्रतिष्ठार्थं सुवर्णमग्निदैवतं अमुक
गोत्राय अमुकप्रवराय अमुकशर्मणे वराय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात्॥ स्वस्तीति प्रतिवचनं गोमिथु
नं वा दद्यात्॥ ॐ को दात्कस्माऽदात्कामोऽदात्का मायादात्कामो दाता कामः प्रतिग्रहीता कामैतत्ते इति वरः पठेत्॥
ततस्तां पाणौ गृहीत्वा ॐ यदैषि मनसा दूरं दिशोऽनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु श्री अ
मुकदेवी इति पठन्निष्क्रामति॥ ततो वेदिदक्षिणस्यां दिशि वारिपूर्णकलशं ऊर्द्धं तिष्ठतो मौनिनो दृढपुरुषस्य स्कंधे अभिषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपर्यंतं धारयेत्ततः परस्परं समीक्षेयाताम् इति कन्याप्रेक्षानंतरं ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसू
र्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे॥ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरस्तृतीयो अग्निष्टे पतिस्तुरीयस्तेम
नुष्यजाः॥ सोमो ददद्गंधर्वाय गंधर्वो ददद्ग्नये॥ रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां॥ सा नः पूषा शिवतमामैरय सा न॰
ऊरु उशती विहरय स्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै॥४॥ इति वरपठितमंत्रान्ते परस्परं निरीक्षणं॥ अ
थ कुशकंडिका॥ ततोग्निं प्रदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टितं तृणपूलकं कटं वा तदुपरि दक्षिणं चरणं दत्वा वधूं द
क्षिणतः कृत्वा तामुपवेश्य स्वयमुपविश्य वरः पुष्पचंदनतांबूलवस्त्राण्यादाय ॐ अद्य कर्तव्यविवाहहोमकर्मणि कृ
ताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृ
णे इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं॥ यथाविहितं कर्म कुरु इति वरेणोक्ते ॐ करवाणीति ब्राह्मणो व
देत्॥ ततोग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ब्रह्माणमग्निं प्रदक्षिणक्रमेणानीयात्र त्वं मे
ब्रह्मा भवेत्यभिधाय कल्पितासने उपवेशयेत्॥ ॐ अद्य कर्तव्यविवाहकर्मणि कृताकृतावेक्षणरूपआचार्यकर्मक॰
र्तुममुकगोत्रममुकशर्माणं आचार्यं पुष्पचंदनतांबूलवासोभिः आचार्यत्वेन त्वामहं वृणे ॐ वृतोस्मीति प्रतिवचनं॥ त॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा पूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात्॥ ततः
परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीता
पर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणी
पात्रं आज्यस्थाली संमार्जनार्थं कुशत्रयं उपयमनार्थं वेणीरूपकुशत्रयं समिधस्तिस्रः स्रुव आज्यं षट्पंचाशदुत्तरय-
जमानमुष्टिशतद्वयावच्छिन्नपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयं॥ अथ तत्सामेव दिशि असा-
धारणावस्तून्युपकल्पनीयानि तत्र शमीपालाशमिश्रा लाजा दृषदुपलं कुमारीभ्राता सूर्प्यः दृढपुरुषः अन्यदपि तदुपयु
क्तमालेपनादि द्रव्यं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अना
मिकांगुष्ठाभ्यां उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणं अनामिकांगुष्ठाभ्यां पवित्रे गृही-
त्वा त्रिरुद्गिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणं प्रोक्षणीजलेन यथासादितवस्तुसेचनं ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपा
त्रनिधानं आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण वन्हौ तत्प्र
क्षेपः पर्यग्निकरणं ततः स्रुवप्रतपनं कृत्वा संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवसंमार्जनं प्रणीतोदकेन अभ्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि·प·
११

स्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततः आज्यस्याग्नेरवतारणं ततः आज्ये प्रोक्षणीवदुत्पवनं अवेक्ष्य सत्यपद्रव्ये निरसनं
पुनः प्रोक्षण्युत्पवनं ततः उपयमनकुशान् वामहस्तेनादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः तिस्रः समिधः
क्षिपेत्॥ ततः उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्षणं कृत्वा प्रणीतापात्रे पवित्रे निधाय पातितदक्षि
णजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनंतरं
स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये॥ इति मनसा॥ ॐ इंद्राय स्वाहा
इदमिंद्राय इत्याघारौ॥ ॐ अग्नये स्वाहा इदमग्नये॥ ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ॥ अथ कलशप्रतिष्ठा॥ व
रुणगणेशपूजां कृत्वा॥ ॐ भूः स्वाहा इदं भूः॥ ॐ भुवः स्वाहा इदं भुवः॥ ॐ स्वः स्वाहा इदं स्वः॥ एता महाव्याहृतयः॥ ॐ त्व
न्नो अग्न इति वामदेव ऋषिरग्निवरुणौ देवते त्रिष्टुप् छंदो होमे विनियोगः॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव
यासिसीष्ठाः॥ यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां॥ ॐ सत्वन्नो अग्ने
वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरु राम
णाभ्यां॥ अयाश्चाग्न इति वामदेव ऋषिरग्निर्देवता त्रिष्टुप् छंदः सर्वप्रायश्चित्त होमे विनियोगः॥ ॐ अयाश्चाग्नेस्य ११
इदमग्नये॥ इदं वायवे॥ इदं सूर्यायेति वा ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नभिशस्तिपाश्चसत्वमित्वमयाऽअसि॥ अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा इदमग्नये॥ ॐ येनेशतंवरुणाये
सहस्रंयज्ञियाःपाशाविततामहान्तस्तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः स्वाहा इदंवरुणायसवित्रे
विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमं श्रथाय॥ अथावय
मादित्यव्रतेतवानागसोअदितयेस्याम स्वाहा इदंवरुणाय अदितये एताः प्रायश्चित्तसंज्ञकाः ततोऽन्वारब्धंविना॥
ॐ प्रजापतये स्वाहा इदंप्रजापतये॥ ॐ अग्नयेस्विष्टकृते स्वाहा इदमग्नयेस्विष्टकृते॥ उदकोपस्पर्शनं॥ अथरा
ष्ट्रभृतः॥ ॐ ऋताषाडृतधामाग्निर्गंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मै स्वाहा वाट्॥ इदमृतासाहेऋतधाम्नेऽग्नयेगंध
र्वाय॥ ॐ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसोमुदोनामताभ्यः स्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यः॥
ॐ संहितोविश्वसामासूर्योगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट् इदंसंहितायविश्वसाम्नेसूर्यायगंधर्वा
य॥ ॐ संहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोप्सरसआयुवोनामताभ्यः स्वाहा॥ इदंमरीचिभ्योप्सरोभ्यःआ
युभ्यः॥ ४॥ ॐ सुषुम्णाः सूर्यरश्मिश्चंद्रमागंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट् इदंसुषुम्णायसूर्यरश्मये
चंद्रमसेगंधर्वाय॥ ॐ सुषुम्णाः सूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यः स्वाहा॥ इदंनक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि.प. १२

त्रेभ्यो ऽप्सरोभ्यो मेकुरुभ्यः॥ ॐ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदमिषिराय विश्व
व्यचसे वाताय गंधर्वाय॥ ॐ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो अप्सरस ऊर्ज्जो नाम ताभ्यः स्वाहा इदमद्भ्यो ऽप्सरो
भ्य ऊर्ग्भ्यः॥ ॐ भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय।
ॐ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा॥ इदं दक्षिणाभ्यो ऽप्सरोभ्यस्तावाभ्यः॥ ॐ
प्रजापतिर्विश्वकर्मा मनो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय॥ ॐ प्र
जापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा इदमृक्सामेभ्यो ऽप्सरोभ्य एष्टिभ्यः॥
१२॥ उदकस्पर्शनं॥ ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजं इति राष्ट्रभृतः॥ अथ जया होमः ॐ चित्तं
च स्वाहा इदं चित्ताय॥ ॐ चित्तिश्च स्वाहा इदं चित्त्यै ॐ आकूतं च स्वाहा इदमाकूताय॥ ॐ आकूतिश्च स्वाहा इदमाकू
त्यै॥ ॐ विज्ञातं च स्वाहा इदं विज्ञाताय॥ ॐ विज्ञातिश्च स्वाहा इदं विज्ञात्यै॥ ॐ मनश्च स्वाहा इदं मनसे॥ ॐ शक्करीश्च
स्वाहा इदं शक्करीभ्यः॥ ॐ दर्शश्च स्वाहा इदं दर्शाय॥ ॐ पौर्णमासं च स्वाहा इदं पौर्णमासाय॥ ॐ बृहच्च स्वाहा इदं बृ
हते॥ ॐ रथंतरं च स्वाहा इदं रथंतराय॥ ॐ प्रजापतिर्ज्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु॥ तस्मै विशः

राम १२

CC-0. In Public Domain. Digitization by eGangotri

समनमनः स्वीसउग्रः सइहव्योवभूवस्वाहा इदंप्रजापतयेजयानिंद्राय॥ इतिजयाहोमः॥ उदकोपस्पर्शनं॥ ॐ अ-
ग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ᳫं स्वाहा
इदमग्नयेभूतानामधिपतये॥ ॐ इंद्रोज्येष्ठानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मि-
न्कर्मण्यस्यांदेवहूत्या ᳫं स्वाहा इदमिंद्रायज्येष्ठानामधिपतये॥ ॐ यमः पृथिव्या अधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मि-
न्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ᳫं स्वाहा इदंयमायपृथिव्या अधिपतये॥ अत्रप्रणीतोद-
कस्पर्शः॥ ॐ वायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदे-
वहूत्या ᳫं स्वाहा इदंवायवे अंतरिक्षस्याधिपतये॥ ॐ सूर्य्योदिवोधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामा-
शिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ᳫं स्वाहा इदंसूर्य्यायदिवोधिपतये॥ ॐ चंद्रमानक्षत्राणामधिपतिः
समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ᳫं स्वाहा इदंचंद्रमसेनक्षत्रा-
णामधिपतये॥ ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्-
कर्मण्यस्यांदेवहूत्या ᳫं स्वाहा इदंबृहस्पतये ब्रह्मणोधिपतये॥ ॐ मित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि.प. एयस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याᳪंस्वाहाइदंमित्रायसत्यानामधिपतये॥ ॐवरु
१३ णोपामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳪंस्वाहा
इदंवरुणायापामधिपतये॥ ॐसमुद्रः स्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपु
रोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳪंस्वाहाइदंसमुद्रायस्रोत्यानामधिपतये॥ ॐअन्नᳪंसाम्राज्यानामधिपतिः
समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳪंस्वाहाइदमन्नायसाम्रा
ज्यानामधिपतये॥ ॐसोमऔषधीनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मि
न्कर्मण्यस्यांदेवहूत्याᳪंस्वाहाइदंसोमायौषधीनामधिपतये॥ ॐसविताप्रसवानामधिपतिः समावत्वस्मिन्ब्र
ह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳪंस्वाहाइदंसवित्रेप्रसवानामधिपतये॥
ॐरुद्रः पशूनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या
ᳪंस्वाहाइदंरुद्रायपशूनामधिपतये॥ अत्रप्रणीतोदकस्पर्शः॥ ॐत्वष्टारूपाणामधिपतिः समावत्वस्मिन्ब्रह्म राम
ण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳪंस्वाहाइदंत्वष्ट्रेरूपाणामधिपतये॥ ॐविष्णुः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्यां स्वाहा इदं-
विष्णवे पर्वतानामधिपतये॥ ॐ मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधाया-
मस्मिन् कर्म्मण्यस्यां देवहूत्यां स्वाहा इदं मरुद्भ्यो गणानामधिपतिभ्यः॥ ॐ पितरः पितामहाः परेवरे ततास्ततामहा इ-
ह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्यां स्वाहा इदं पितृभ्यः पितामहे-
भ्यः परेभ्यो वरेभ्यस्ततेभ्यस्ततामहेभ्यः॥ अत्र प्रणीतोदकोपस्पर्शनं॥ इत्याभ्यातानं नामकं॥ ॐ अग्निरैतु प्रथमो देवता-
नां सोस्यै प्रजां मुञ्चतु मृत्युपाशान्॥ तदय राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात् स्वाहा इदमग्नये॥
ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः॥ अशून्योपस्थाजीवतामस्तु माता पौत्रमानन्दमभिवि-
बुध्यतामियं स्वाहा इदमग्नये॥ ॐ स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र॥ यदस्यां महि दिवि जातं
प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा इदमग्नये॥ ॐ सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः॥ अ-
पैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा इदं वैवस्वताय॥ अत्र प्रणीतोदकस्पर्शनं॥ तत अन्तरपटं॥
ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृ स्वाहा इदं मृत्यवे॥ अत्र प्रणीतोदकोपस्पर्शनं॥ ततो वधूमग्रतः कृत्वा वरो वधूश्च द्वावपि प्राङ्मुखौ स्थितौ भवतः ततो वरांज
लिपुटोपरि संलग्न वध्वंजलिस्थ घृताभिघारित वधूभ्रातृदत्त शमीपलाशमिश्रै र्लाजैर्वधूकर्तृको मंत्रपाठपूर्वको होमः॥
तत्र मंत्राः॥ अर्य्यमणमित्याथर्वणा ऋषिरग्निर्देवतानुष्टुप् छन्दो लाजाहोमे विनियोगः॥ ॐ अर्य्यमणं देवं कन्या अग्निम
यक्षत स नो अर्यमा देवः प्रेतो मुंचतु मा पतेः स्वाहा इदमर्य्यम्णे देवाय॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका आयुष्मानस्तु
मे पतिरेधंतां ज्ञातयो मम स्वाहा इदमग्नये॥ ॐ इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव॥ मम तुभ्यं च संवननं तदग्निरनुमन्यता
मियं स्वाहा इदमग्नये॥ ततो वरो वधूदक्षिणहस्तं सांगुष्ठं गृह्णाति॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा
सः॥ भगो अर्य्यमा सविता पुरंधिर्म्मह्यं त्वादुर्गार्हपत्याय देवाः॥ अमोहमस्मि सा त्वं सा त्वमस्यमो अहं सामाहमस्मि ऋक् त्वं द्यौ
रहं पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै॥ प्रजां प्रजनयावहै पुत्रान् विंदावहै बहून्॥ ते संतु जरदष्टयः संप्रियौ रोचि
ष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति मंत्रेण अथैनां वधूं अश्मानमारोहयति
उत्तरतोऽग्नेर्दक्षिणपादेन अथ वधूमग्रेकृत्वा ततः प्राङ्मुखीं पूर्वोपकल्पितं दृषदुपलं दक्षिणपदेनारोहयति वरः॥ ॐ आरो एम
हेममश्मानमश्मेव त्वं स्थिरा भव॥ अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः इति मंत्रेण आरूढायामेव तस्यां वरो गाथां १४

गायति॥ ॐ सरस्वतिप्रेदमिव सुभगे वाजिनीवति॥ यांत्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं ज
गत्॥ तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः॥ ततोग्रे वधूः पश्चाद्वरः प्रणीताब्रह्मसहितमग्निं प्रदक्षिणं कुरुतः तत्र वरपठनी
योमंत्रः॥ ॐ तुभ्यमग्ने पर्य्यवहन्सूर्यां वहतुना सह॥ पुनः पतिभ्यो जायां दग्ने प्रजया सह॥ ततः पश्चादग्नेः स्थित्वा लाजहोमसांगु
ष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणं पुनरपि तथैव एतेन न वलाजाहुतयः सांगुष्ठहस्तग्रहणात्रयगाथागानत्रयंप्र
दक्षिणत्रये संपद्यते ततो अवशिष्टलाजैः कन्याभ्रातृदत्तैरंजलिस्थैः सूर्यं कोणेन वधूर्जुहोति॥ ॐ भगाय स्वाहा इदं भगाय॥
चतुर्थं भ्रमणं तूष्णीं अग्रे वरः पश्चात् वधूः ततस्तूष्णीं परिक्रमणम् ततो वरः उपविश्य ब्रह्मणान्वारब्धः आज्येन प्राजापत्यं
जुहुयात्॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा॥ अत्र प्रोक्षणीपात्रहुतशेषाज्यप्रक्षेपः॥ तत आलेपनेनोत्तरो
त्तरकृतसप्तमंडलेषु सप्तपदाक्रमणं वरः कारयति वक्ष्यमाणमंत्रैः॥ तत्र प्रथमे एकमिषे विष्णुस्त्वा नयतु॥ द्वितीये द्वे
ऊर्जे विष्णुस्त्वा नयतु॥ तृतीये त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु॥ चतुर्थे चत्वारि मायोभवाय विष्णुस्त्वा नयतु॥ पं
चमे पंच पशुभ्यो विष्णुस्त्वा नयतु॥ षष्ठे षड् ऋतुभ्यो विष्णुस्त्वा नयतु॥ सप्तमे सखे सप्तपदा भव सा मामनुव्रता भव वि
ष्णुस्त्वा नयतु॥ ततोग्नेः पश्चादुपविश्य पुरुषस्य स्कंधे स्थितकुंभादाम्रपल्लवेन जलमानीयते वच वरो वधूं एनां मू

CC-0. In Public Domain. Digitization by eGangotri

र्द्वन्त्यभिषिंचति॥ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजमिति पुनस्तयैवानीतजलेनात्मानम
भिषिंचति॥ॐ आपोहिष्ठा मयोभुवस्तान ऊर्ज्जे दधातन॥ महेरणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः
॥उशतीरिव मातरः॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ॥ आपो जनयथा च नः॥ इति तिसृभिः॥ अथैनां सूर्यमुदीक्ष
स्वेति॥ॐ तच्चक्षुरित्यनेन मंत्रेण वधूः सूर्यं पश्यति अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति पतिः प्रैषानंतरं ध्रुवं पश्यति॥ त
त्र पठनीयो मंत्रः॥ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद् बृहस्पतिर्मया पत्या प्रजावती संजीव श
रदः शतमिति॥ एष्टासा पदि न पश्यति तथापि पश्यामीति ब्रूयात्॥ ततो वरो वधूदक्षिणांसोपरि हस्तं नीत्वा तस्या हृदय
मालभेत्॥ मम व्रते ते हृदयं दधामि॥ मम चित्तमनु चित्तं ते अस्तु॥ मम वाचमेकमना जुषस्व॥ प्रजापतिस्त्वा नियुनक्तु म
ह्यमिति मंत्रेण अथैनामभिमंत्रयति वरः॥ॐ सुमंगलीरियं वधूरिमाᳬ समेत पश्यत॥ सौभाग्यमस्यै दत्वाय याथास्तं
विपरेतन इति मंत्रेण वरस्य वामभागे वधूमुपवेशयति॥ सिंदूरदानं करोति वध्वा वध्वासीमंते वरः॥ अथ वधूं बलवान्क श्चिन् ब्राह्मण
उत्थाय प्रागुदग्वानुगुप्तागारे लोहितानडुहचर्म्मणि प्रतिलोमास्तीर्णे उपवेशयेत् वरो वा ॐ इह गावो निषीदंत्वि राम॰
हाश्वा इह पू षा इहा सहस्रदक्षिणो यज्ञ इह पूषा निषीदंत्विति मंत्रेण॥ अथ स्विष्टकृद्धोमः॥ ॐ अग्नये स्विष्ट १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृते स्वाहा इदमग्नये स्विष्टकृते ॥ स्रुवावशिष्टाज्यस्य प्राक्षणीपात्रे प्रक्षेपः ॥ अयं च होमो ब्रह्मणान्वारब्धकर्तृकः ॥ त
त आचम्य संस्रवप्राशनं ॥ अथाचम्य ॐ अद्य कृतैतत् विवाहहोमकर्म्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतम
मुकगोत्रायामुकशर्म्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दद्यात् स्वस्तीति प्रतिवचनं ॥
ॐ अद्य कृतैतद्विवाहहोमकर्म्मणि आचार्य्यकर्म्मप्रतिष्ठार्थम् इदं हिरण्यमग्निदैवतं द्रव्यम् यथानामगोत्रायाऽमु
कशर्म्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ॥ ततो ब्रह्मग्रन्थिविमोकः ॥ ॐ सुमित्रिया न आप ओषधयः संतु इ
ति पवित्रं गृहीत्वा प्रणीताजलेन शिरः संमृज्य ॥ ॐ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणी
तां न्युब्जीकुर्यात् ॥ तत आस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव बर्हिर्होमः तत्र मंत्रः ॥ ॐ देवा गातुवि
दो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः स्वाहा ॥ तत उत्थाय वधूदक्षिणहस्तेन स्रुवस्थघृत
पुष्पफलैः पूर्णाहुतिः ॥ तत्र मंत्रः ॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं ॥ कविꣳ सम्राजम
तिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा ॥ ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॥ ॐ त्र्या
युषं जमदग्नेरिति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॥ ॐ यद्देवेषु त्र्यायुषमिति दक्षिणांसे ॥ ॐ तन्नो अस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·प· ध्याप्तुषमिति हृदि ॥ एवं वध्वा अपि कुर्यात् ॥ ततो हस्त स्वस्थाने तनेइति विशेषः ॥ तत आचारात् शणशंखशमीसुवर्ण
१६ प्रेरित सिंदूर करणं वरः कर्तव्यं ततो ऽन्यैरपि प्रतिष्ठित स्त्री पुरुषैः सिंदूर करणं ग्राम्य वचने वरः कुर्यात् ग्राम्याः स्त्रियः
॥ अथ वेदितो मंडपमागत्य दूर्वा स्नानादिग्रहणं ततस्त्रिरात्रमक्षारलवणाशिनो अधःशायिनो निवृत्तमैथुनौ भवतः प्रा
ङ्मुखो वधूवरौ स्थितौ भवतः ॥ इति विवाहकर्मपद्धतिः समाप्ता ॥ अथ चतुर्थीकर्म ॥ ततश्चतुर्थ्यामपररात्रे चतुर्थीक
र्म तत्र गृहाभ्यंतर एव कार्यं ततः उद्वर्तनादि कृत्वा युगकाष्ठमुपविश्य स्नात्वा शुद्धवस्त्रं परिधाय गृहं प्रविश्य
वधूवरौ प्राङ्मुखौ भवतः ॥ ॐ गणपत्यादिदेवतापूजनं ॥ ततः कुशकंडिकारंभः ॥ तत्रक्रमः ॥ जामातृहस्तपरिमि
तां वेदिं कुशैः परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रप्रादेशमात्रं त्रिरु
त्तरोत्तरक्रमेणोल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रेणाग्निमानी
य स्वाभिमुखं निदध्यात् ततः पुष्पचंदनतांबूलवस्त्राण्यादाय ॐ अस्यां रात्रौ कर्तव्य चतुर्थी होमकर्मणि कृताकृ
तावेक्षणरूप ब्रह्मकर्म कर्तुं होतृकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनादिभिर्ब्रह्मत्वेन राम·
होतृत्वेन च त्वामहं वृणोइति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं ॥ यथाविहितं कर्म कुर्विति वरेणोक्ते ॐ कर १६

CC-0. In Public Domain. Digitization by eGangotri

वाचीति ब्राह्मणो वदेत्॥ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ब्रह्माणमग्निं प्रदक्षिण
क्रमेणानीय ॐ अत्र त्वं मे ब्रह्मा भवेत्यभिधाय ॐ भवानीति ब्राह्मणेनोक्ते कल्पितासने उदङ्मुखं ब्रह्माणमुपवेशये
त्॥ततः पृथूदकपात्रमग्नेरुत्तरतः प्रतिष्ठाप्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखम
वलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं वर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं ब्रह्मणोऽग्निप
र्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रछेदनार्थं कुशत्रयं पवित्रकरणा
र्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली संमार्जनार्थं कुशत्रयं उपयमनार्थं वेणीरूपकुशत्रयं संधि
स्तिस्त्रः स्रुवः आज्यं षट्पंचाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नं तंदुलपूर्णपात्रं एतानि पवित्रछेदनकुशानां पूर्व
दिशि क्रमेणासादनीयानि ततः पवित्रछेदनकुशैः पवित्रे छित्वा प्रादेशमितपवित्रकरणं ततः सपवित्रकरेण प्र
णीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे धृत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्य
हस्तकरणं पवित्रे गृहीत्वा त्रिरुद्दिङ्गनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनं ततो
ऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधाय आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रदक्षिणक्रमेणपर्यग्निकरणंततःस्रुवंप्रतप्यसंमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतःस्रुवसंमार्जनंप्रणीतोदके
नाभ्युक्ष्यपुनःप्रतप्यस्रुवंदक्षिणतोनिदध्यात्ततःआज्यस्याग्रेरवतारणंततआज्येप्रोक्षणीवदुत्पवनंअवेक्ष्यसत्यप
द्रव्येतन्निरसनंपुनःपूर्ववत्प्रोक्षण्युत्पवनंउपयमनकुशान्वामहस्तेनादायउत्तिष्ठन्प्रजापतिंमनसाध्यात्वातूष्णी
मग्नौघृताक्ताःसमिधस्तिस्रःक्षिपेत्ततउपविश्यप्रोक्षणीजलेनाग्निंप्रदक्षिणंपर्युक्ष्यपवित्रंप्रणीतापात्रेधृत्वाब्र
ह्मणान्वारब्धःपातितदक्षिणजानुर्जुहुयात्तत्राघारादारभ्याहुतिचतुष्टयेतत्तदाहुत्यनन्तरंस्रुवावस्थिताज्यंप्रोक्षण्यां
क्षिपेत्॥ ॐ प्रजापतयेस्वाहाइदंप्रजापतये॥ इतिमनसा॥ ॐ इन्द्रायस्वाहाइदमिंद्रायइत्याघारौ॥ ॐ अग्नयेस्वाहाइद
मग्नये॥ ॐ सोमायस्वाहा॥ इदंसोमायइत्याज्यभागौ॥ ततआज्याहुतिपंचतयेस्थालीपाकाहुतौचप्रत्याहुत्यनंतरंस्रु
वावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपःततोब्राह्मणान्वारब्धंविना॥ ॐ अग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिर
सिब्राह्मणस्त्वानाथकामउपधावामियास्यैपतिघ्नीतनूस्तामस्यैनाशयस्वाहाइदमग्नये॥ ॐ वायोप्रायश्चित्तेत्वंदेवा
नांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहाइदंवायवे॥ ॐ सूर्यप्रा राम·
यश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वाहाइदंसूर्या १७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य॥ ॐ चंद्रप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय
स्वाहा इदं चंद्राय॥ ॐ गंधर्वप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी
तनूस्तामस्यै नाशय स्वाहा इदं गंधर्वाय॥ ततः स्थालीपाकेन जुहुयात्॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा
॥ अग्न्याहुतिनवके हुतशेष घृतस्य प्रोक्षणीपात्रे प्रक्षेपः॥ अयं च होमो ब्रह्मणान्वारब्ध कर्तृकः॥ ततः आज्यस्थालीपा
काभ्यां स्विष्टकृद्धोमः॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते॥ ततः आज्येन ॐ भूः स्वाहा इदं भूः॥ ॐ भुवः
स्वाहा इदं भुवः॥ ॐ स्वः स्वाहा इदं स्वः॥ एता महाव्याहृतयः॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः
॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाᳫंसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां॥ ॐ सत्वन्नो अग्ने वमो भवो
नी नेदिष्ठो अस्या उषसो व्युष्टौ॥ अवयक्ष्वनो वरुणᳫं रराणो वीहि मृडीकᳫं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां॥
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमयाअसि॥ अयानो यज्ञं वहास्ययानो धेहि भेषजᳫं स्वाहा इदमग्नये॥ ॐ
येते शतं वरुणयेसहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा इदं व
रुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमᳫं श्रथाय॥ अथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·प· वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा॥ इदं वरुणाय॥ एताः प्रायश्चित्तसंज्ञकाः॥ ॐ प्रजापतये स्वाहा। इदं
१८ प्रजापतये इति मनसा॥ इदं प्राजापत्यम्॥ ततः संस्रवप्राशनं॥ तत आचम्य॥ ॐ अस्यां रात्रौ कृतैतच्चतुर्थीहोमकर्मणि
कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां
तुभ्यमहं संप्रददे इति दक्षिणां दद्यात्॥ स्वस्तीति प्रतिवचनं॥ ततो ब्रह्मग्रंथिविमोकः॥ ततः सुमित्रिया न आप ओष
धयः संतु इति पवित्राभ्यां शिरः सं मृज्य॥ ॐ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्म इत्यैशान्यां दिशि प्रणीतां
न्युब्जीकुर्यात्॥ ततस्तरणक्रमेण बर्हिरुत्थाप्य घृतात्तं हस्तेनैव जुहुयात्॥ ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनस
स्पत इमं देव यज्ञꣳ स्वाहा वाते धाः स्वाहा॥ आम्रपल्लवेन जलमानीय मूर्ध्नि वरो वधूमभिषिंचति॥ ॐ या ते पतिघ्नी प्रजा
घ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह श्री अमुकदेवि इति मंत्रेण॥ ततो
वधूः स्थालीपाकं प्राशयति वरः॥ ॐ प्राणैस्ते प्राणान् संदधामि॥ ॐ अस्थिभिस्तेऽस्थीनि संदधामि॥ ॐ मांसैस्ते मां
सानि संदधामि॥ ॐ त्वचा ते त्वचि संदधामि॥ इति मंत्रचतुष्टयेन प्रतिमंत्रं तमन्नं प्राशयेत्॥ ततो वधूहृदयं स्पृष्ट्वा व रा·म·
रः पठेत्॥ ॐ यत्ते सुशीमे हृदयं दिवि चंद्रमसि श्रितं वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणु १८

याम शरदः शतमिति ॥ अथ कंकणमोक्षणादीनि ग्रंथिविमोकादीनि आचारप्राप्तानि ततउत्थाय वधूदक्षिणह
स्तस्थ स्रुवेण धृतफलपुष्पपूर्णेन पूर्णाहुतिं कुर्यात् ॥ ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं
॥ कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा इति मंत्रेण पूर्णाहुतिः ॥ ततः स्रुवेण भस्मानीयद
क्षिणानामिकाग्रगृहीत भस्मना ॥ ॐ त्र्यायुषं जमदग्नेः ॥ इति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॥ ॐ
यद्देवेषु त्र्यायुषं इति दक्षिणबाहुमूले ॥ तन्नो अस्तु त्र्यायुषं इति हृदये ॥ एवं वध्वा अपि त्र्यायुषं कुर्यात् ॥ तन्नो इत्यस्य स्था
ने तन्ते इति विशेषः ॥ तत आचार्याय दक्षिणां दद्यात् ॥ होत्रे च दक्षिणां दद्यात् । भूयसीं दद्यात् ॥ इति चतुर्थी कर्म समा
प्तम् ॥ संम्वत १९४५ मिति माघवदि १२ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतिवीवाहसमाप्त ॥

इसिहार दियाजाता है ग्राहक लोगों को की बम्बई आगरा मेरठ लखनऊ कलकत्ता इलाहाबाद व
...रस और करइएक ... कीए
न महाशयों को लेने की इच्छा

लकैं हमाने इहां मौजूद हैं जि
होय तो आध आने का टिकट भे

ज के सूची मंगवा पले वें इस कार्य के सम्पादक बाबू कौलेश्वर सिंह बुकसेलर बनारस ॥ ॥ ॥